# रघूत्तम गुरु स्तोत्रम्

गंभीराशयगुंफसंभृतवचःसंदर्भगर्भोल्लस–
ट्टीकाभावविबोधनाय जगतां यस्यावतारोऽजनि ।
तत्पादृक्षदुरंतसंतततपःसंतानसतोषित–
श्रीकांतं सुगुणं रघोत्तमगुरुं वंदे परं देशिकम् ॥ १ ॥

सच्छास्त्रामलभावबोधकिरणैः संवर्धयन् मध्वस्–
त्सिद्धांताब्धिमनंतशिष्यकुमुदव्रातं विकासं नयन् ।
उद्भूतो रघुवर्यतीर्थजलधेस्तापत्रयं त्रासयन्
यस्तं नौमि रघूत्तमाख्यशशिनं श्रीविष्णुपादाश्रयम् ॥ २ ॥

उद्यन्मार्तंडसंकाशं दंडमालाकमंडलून् ।
धरं कौपीनसूत्रं च सीताराघवमानसम् ॥ ३ ॥

श्रीनिवासेन वंद्यांघ्रिं तुलसीदामभूषणम् ।
ध्यायेद्रघूत्तमगुरुं सर्वसौख्यप्रदं नृणाम् ॥ ४ ॥

रघूत्तमगुरुं नौमि शांत्यादिगुणमंडितम् ।
रघूत्तमपदद्वंद्वकंजभृंगायितांतरम् ॥ ५ ॥

रघूत्तमगुरुं वंदे रघूत्तमपदार्चकम् ।
गांभीर्येणार्थबाहुल्यटीकातात्पर्यबोधकम् ॥ ६ ॥

भावबोधकृतं नौमि भावभावितभावुकम् ।
भावभाजं भावजादिपरीभावपरायणम् ॥ ७ ॥

सन्न्यायविवृतेष्टीकाशेषसंपूर्तिकारिणम् ।
टीकां दृष्ट्वापेटिकानां निचयं च चकार यः ।
प्रमेयमणिमालानां स्थापनाय महामतिः ॥ ८ ॥

यच्छिष्यशिष्यशिष्याद्याष्टिप्पण्याचार्यसंज्ञिताः ।
तमलं भावबोधार्यं भूयो भूयो नमाम्यहम् ॥ ९ ॥

शुकेन शांत्यादिषु वाङ्मयेषु व्यासेन
धैर्येऽम्बुधिनोपमेयम् ।
मनोजजित्यां मनसां हि पत्या
रघूत्तमाख्यं स्वगुरुं नमामि ॥ १० ॥

राम राम तव पादपंकजं चिंतयामि भवबंधमुक्तये ।
वंदितं सुरनरेंद्रमौलिभिर्ध्यायते मनसि योगिभिः सदा ॥ ११ ॥

पिनाकिनीरसंजुष्टदेशे वासमनोरमम् ।
पिनाकिपूज्यश्रीमध्वशास्त्रवर्धिनिशाकरान् ॥ १२ ॥

पंचकैर्भावभोधाख्यैर्ग्रंथैः पंचलसन्मुखैः ।
तत्त्वविज्ञापकैः स्वानामुपमेयं पिनाकिना ॥ १३ ॥

गांभीर्ये सर्वदुर्वादिगिरिपक्षविदारणे ।
विषयेषु विरागित्वे चोपमेयं पिनाकिना ॥ १४ ॥

धरणे भगवन्मूर्तेर्भरणे भक्तसंततेः ।
विना विना चोपमेयं मेयं तत्त्वप्रकाशने ॥ १५ ॥

गुरुत्वेऽखिललोकानां प्रदानेऽभीष्टसंततेः ।
शिष्येभ्यस्तत्त्वविज्ञानप्रदाने परमं गुरुम् ॥ १६ ॥

सदाररामपादाब्जसदारतिसुधाकरम् ।
सदाऽरिभेदने विष्णुगदारिसदृशं सदा ॥ १७ ॥

रघुनाथांघ्रिसद्भक्तौ रघुनाथानुजायितम् ।
रघुनाथार्यपाण्युत्थरघुवर्यकरोदितम् ॥ १८ ॥

वेदेशार्चितपादाब्जं वेदेशांघ्र्यब्जपूजकम् ।
रघूत्तमगुरुं वंदे रघूत्तमपदार्चकम् ॥ १९ ॥

रघूत्तमगुरुस्तोत्रस्याष्टकं यः पठेन्नरः ।
रघूत्तमप्रसादाच्च स सर्वाभीष्टभाग्भवेत् ॥ २० ॥

यद्–वृंदावनपूर्वतः फलवती धात्री जगत्पावनी
याम्यायां तु पिनाकिनी चलदलो मूर्तित्रयाधिष्ठितः ।
वारुण्यां दिशि वामतः प्रतिकृतौ छाया कृता तिंत्रिणी
तद्–वृंदावनमध्यगो गुरुवरो भूयात् स नः श्रेयसे ॥ २१ ॥

प्रणत्कामधेनुं च भजत्सुरतरूपमम् ।
श्रीभावबोधकृत्पादचिंतामणिमुपास्महे ॥ २२ ॥

रघूत्तममुनींद्रा ये सर्वे शास्त्रविशारदाः ।
विद्यागुरून् कुलगुरून् नौमि तान् मे जगद्गुरून् ॥ २३ ॥

सेवे रघूत्तममहागुरुम् ।
यच्छिष्यशिष्यशिष्याद्याष्टिप्पण्याचार्यसंज्ञिताः ॥

॥ इति श्रीरघूत्तमगुरुस्तोत्रं संपूर्णम् ॥

www.yousigma.com